अथ

भवानीसहस्रनाम-

प्रारम्भः ।

श्रीगणेशाय नमः ॥ ॥ ॐ नमो भग
वत्यै ॥ ॐ नमो भवान्यै ॥ ॐ शंखत्रि
शूलशरचापकरां त्रिनेत्रां तिग्मेतरांशक
लया विलसत्किरीटाम् ॥ सिंहस्थिताम
सुरसिद्धनुतां च दुर्गां दुर्गानिभां दुरितदुः
खहरां नमामि ॥१॥ ॐ अकुलकुलपतंती
चक्रमध्ये स्फुरंती मधुरमधु पिबंती कंट

भ० कान्भक्षयंती ॥ दुरितमपहरंती साधका स०
१ न्पोषयंती जयति जगति देवी सुन्दरी
क्रीडयंती ॥ २ ॥ चतुर्भुजामेकवक्त्रां पूर्णे
न्दुवदनप्रभाम् ॥ खड्गशक्तिधरां देवीं वर
दाभयपाणिकाम् ॥ ३ ॥ प्रेतसंस्थां
महारौद्रीं भुजगेनोपवर्तिनीम् ॥ भवानीं १
कालसंहारबद्धमुद्राविभूषिताम् ॥ ४ ॥

जगत्स्थितिकरीं ब्रह्मविष्णुरुद्रादिभिः सु
रैः॥स्तुतां तां परमेशानीं नौम्यहं विघ्नहा
रिणीम् ॥५॥ ॐनमो भवान्यै॥ॐकैलास
शिखरे रम्ये देवदेवं महेश्वरम् ॥ध्यानोप
रतमासीनं प्रसन्नमुखपंकजम् ॥६॥ सुरा
सुराशिरोरत्नरंजितांघ्रियुगं प्रभुम् ॥प्रणम्य
शिरसा नंदी बद्धांजलिरभाषत ॥ ७ ॥

श्रीनंदिकेश्वर उवाच ॥ देवदेव जगन्नाथ
संशयोऽस्ति महान्मम ॥ रहस्यमेकमि
च्छामि प्रष्टुं त्वां भक्तवत्सल ॥८॥ देवता
यास्त्वया कस्याः स्तोत्रमेतद्दिवानिशम् ॥
पठ्यतेऽविरतं नाथ त्वत्तः किमपरं महत्
॥९॥इति पृष्टस्तदा देवो नंदिकेन जगद्गुरुः
प्रोवाच भगवानेको विकसन्नेत्रपंकजः ॥

॥ १० ॥ श्रीभगवानुवाच ॥ ॥ साधु साधु गणश्रेष्ठ पृष्टवानसि मां च यत् ॥ स्कंदस्यापि च यद्गोप्यं रहस्यं कथयामि तत्॥११॥पुरा कल्पक्षये लोकान् सिसृक्षु र्मूढचेतसः ॥ गुणत्रयमयी शक्तिर्मूलप्रकृतिसंज्ञिता ॥ १२ ॥ तस्यामहं समुत्पन्न स्तत्त्वैस्तैर्महदादिभिः ॥ चेतनेति ततः

भ० शक्तिर्मां काऽप्यालिंग्य तस्थुषी ॥ १३ ॥ स०
३ हेतुः संकल्पजालस्य मनोऽधिष्ठायिनी
शुभा ॥ इच्छेति परमा शक्तिरुन्मिमील त
तः परम् ॥१४॥ ततो वागिति विख्याता
शक्तिः शब्दमयी पुरा॥प्रादुरासीज्जगन्मा
ता वेदमाता सरस्वती ॥ १५ ॥ ब्राह्मी च ३
वैष्णवी सैंद्री कौमारी पार्वती शिवा ॥

सिद्धिदा बुद्धिदा शांता सर्वमंगलदायिनी ॥ १६ ॥ तयैतत्सृज्यते विश्वमनाधारं च धार्यते ॥ तयैतत्पाल्यते सर्वं तस्यामेव प्रलीयते ॥ १७ ॥ अर्चिता प्रणता ध्याता सर्वभावविनिश्चितैः ॥ आराधिता स्तुता सैव सर्वसिद्धिप्रदायिनी ॥१८॥ तस्या अनुग्रहादेव तामेव स्तुतवानहम् ॥ सहस्रैर्ना

मभिर्दिव्यैस्त्रैलोक्यप्राणिपूजितैः ॥ १९॥
स्तवेनानेन संतुष्टा मामेव प्रविवेशसा॥त
दारभ्य मया प्राप्तमैश्वरं पदमुत्तमम्॥२०।
तत्प्रभावान्मया सृष्टं जगदेतच्चराचरम्।
ससुरासुरगंधर्वं यक्षराक्षसमानवम्॥२१॥
सपन्नगं साब्धिकं च सशैलवनकाननम् ॥
सराशिग्रह नक्षत्रं पंचभूतगुणान्वितम् ॥

॥२२॥नंदिन्नामसहस्त्रेण स्तवेनानेन स
र्वदा ॥ स्तुवे परापरां शक्तिं ममानुग्रहका
रिणीम् ॥२३॥ इत्युक्त्वोपरतं देवं चराच
रगुरुं विभुम्॥प्रणम्य शिरसा नंदी प्रोवाच
परमेश्वरम् ॥ २४ ॥ श्रीनंदिकेश्वर
उवाच ॥ भगवन्देवदेवेश लोकनाथ जग
त्पते॥भक्तोऽस्मि तव दासोऽस्मि प्रसादः

क्रियतां मयि ॥ २५ ॥ देव्याः स्तवामिमं
पुण्यं दुर्लभं यत्सुरैरपि ॥ श्रोतुमिच्छाम्य
हं देव प्रभावमपि चास्य तु ॥ २६ ॥
श्रीभगवानुवाच ॥ ॥ शृणु नंदिन्महाभा
ग स्तवराजमिमं शुभम् ॥ सहस्रैर्नामभि
र्दिव्यैः सिद्धिदं सुखमोक्षदम् ॥ २७॥ शु
चिभिः प्रातरुत्थाय पठितव्यं समाहितैः॥

त्रिकालं श्रद्धया युक्तैर्नातः परतरः स्त
वः ॥ २८ ॥ अथ न्यासः ॥ ॥ ॐ एकवी
रायै अंगुष्ठाभ्यां नमः ॥ ॐ महामायायै
तर्जनीभ्यां नमः ॥ ॐ पार्वत्यै मध्य
माभ्यां नमः ॥ ॐ गिरिशप्रियायै अना
मिकाभ्यां नमः ॥ ॐ गौर्यै कनिष्ठिका
भ्यां नमः ॥ ॐ करालिन्यै करतलकरपृ

भ० ष्ठाभ्यां नमः ॥ ॥ इति करन्यासः ॥ स०
६ एवं षडंगन्यासः ॥ ॐ एकवीरायै हृद
याय नमः॥ ॐ महामायायै शिरसे स्वाहा
॥ ॐ पार्वत्यै शिखायै वषट् ॥ गिरिश
प्रियायै कवचाय हुम् ॥ ॐ गौर्यै नेत्रत्र
याय वौषट् ॥ ॐ करालिन्यै अस्त्राय फ ६
ट् ॥ ॥ ॐ अस्य श्रीभवानीनामसहस्र

स्तवराजस्य श्रीभगवान्महादेव ऋषिः ॥ अनुष्टुप् छन्दः ॥ आद्या शक्तिः ॥ श्रीभगवती भवानी देवता ॥ ह्रीं बीजम् ॥ श्रीं शक्तिः ॥ क्लीं कीलकम् ॥ श्रीभगवती भवानीसंतोषणार्थे सकलकामनासिद्ध्यर्थे पाठे जपे विनियोगः ॥ अथ ध्यानम् ॥ ॐ अर्धेन्दुमौलिममलामम

म० रामिवन्द्यामम्भोजपाशसृणिरक्तकपालह स०
७ स्ताम् ॥ रक्ताङ्गरागवसनाभरणां त्रिनेत्रां
ध्यायेच्छिवस्य वनितां मदविह्वलांगीम् ॥
ॐ बालार्कमण्डलाभासां चतुर्बाहुं
त्रिलोचनाम् ॥ पाशांकुशशरं चापं धार
यंतीं शिवां भजे ॥ ॐ श्रीईश्वर उवा ७
च ॥ ॥ ॐ महाविद्याजगन्माता महा

लक्ष्मीः शिवप्रिया ॥ विष्णुमाया शुभा
शांता सिद्धा सिद्धसरस्वती ॥ १॥ क्षमा
कांतिःप्रभा ज्योत्स्ना पार्वती सर्वमंगला॥
हिंगुला चंडिका दांता पद्मा लक्ष्मीर्हरिप्रि
या ॥२॥त्रिपुरा नंदिनी नंदा सुनंदा सु रवं
दिता ॥ यज्ञविद्या महामाया वेदमाता
सुधा धृतिः॥ ३॥ प्रीतिः प्रथा प्रसिद्धा च

भ० मृडानी विंध्यवासिनी ॥ सिद्धविद्या महा स०
८ शक्तिः पृथ्वी नारदसेविता ॥४॥ पुरुहूत
प्रिया कांता कामिनी पद्मलोचना ॥ प्र
ह्लादिनी महामाता दुर्गा दुर्गतिनाशिनी
॥ ५ ॥ ज्वालामुखी सुगोत्रा च ज्योतिः
कुमुदहासिनी॥ दुर्गमा दुर्लभा विद्या स्वर्ग ८
तिः पुरवासिनी॥६॥अपर्णा शांबरी माया

मदिरा मृदुहासिनी ॥ कुलवागीश्वरी नि
त्या नित्यक्लिन्ना कृशोदरी ॥ ७ ॥ कामेश्व
री च नीला च भीरुंडा वह्निवासिनी॥लंबो
दरी महाकाली विद्या विद्येश्वरी तथा॥८॥
नरेश्वरी चसत्या च सर्वसौभाग्यवर्धिनी॥
संकर्षणी नारसिंही वैष्णवी च महोदरी
॥ ९ ॥ कात्यायनी च चंपा च सर्वसंपत्ति

कारिणी ॥ नारायणी महानिद्रा योगानि
द्रा प्रभावती ॥ १० ॥ प्रज्ञापारमिता प्रज्ञा
तारा मधुमती मधु ॥ क्षीरार्णवसधाहारा
कालिका सिंहवाहना ॥ ११ ॥ ॐकारा
च सुधाकारा चेतना कोपना कृतिः ॥
अर्धबिंदुधराधारा विश्वमाता कलावती
॥१२॥ पद्मावती सुवस्त्रा च प्रबुद्धा च सर

स्वती ॥ कुंडासना जगद्धात्री बुद्धमाता
जिनेश्वरी ॥ १३ ॥ जिनमाता जिनेंद्रा च
शारदा हंसवाहना ॥ राज्यलक्ष्मीवषट्कारा
सुधाकारा सुधोत्सुका ॥ १४ ॥ राजनीति
स्त्रयीवार्ता दंडनीतिः क्रियावती ॥ सद्भू
तिस्तारिणी श्रद्धा सद्गतिः सत्परायणा
॥ १५ ॥ सिंधुर्मंदाकिनी गंगा यमुना च

म० १० सरस्वती ॥ गोदावरी विपाशा च कावेरी च शतह्रदा ॥ १६ ॥ सरयूश्चंद्रभागा च कौशिकी गंडकी शुचिः॥नर्मदा कर्मनाशा च चर्मण्वत्यथ वेदिका॥ १७ ॥ वेत्रवती वितस्ता च वरदा नरवाहना ॥ सती पतिव्रता साध्वी सुचक्षुः कुंडवासिनी ॥१८॥ एकचक्षुः सहस्राक्षी सुश्रोणिर्भगमालि

स० १०

नी ॥ सेनाश्रेणिः पताका च सुव्यूहा युद्ध
कांक्षिणी ॥ १९ ॥ पताकिनी दया रंभा
विपंची पंचमप्रिया ॥ परापरकला कांता
त्रिशक्तिर्मोक्षदायिनी॥२०॥ऐंद्री माहेश्व
री ब्राह्मी कौमारी कूलवासिनी॥इच्छाभ
गवती शक्तिः कामधेनुः कृपावती ॥२१॥
वज्रायुधा वज्रहस्ता चंडी चण्डपराक्रमा॥

भ० ११ गौरी सुवर्णवर्णा च स्थितिसंहारकारिणी ॥ २२ ॥ एकानेका महेज्या च शतबाहु र्महाभुजा ॥ भुजंगभूषणा भूषा षट्चक्र क्रमवासिनी ॥२३॥ षट्चक्रभेदिनी श्या मा कायस्था कायवर्जिता ॥ सुस्मिता सु मुखी क्षामा मूलप्रकृतिरीश्वरी॥२४॥अजा च बहुवर्णा च पुरुषार्थप्रवर्तिनी ॥ रक्ता स० ११

नीलासिताश्यामा कृष्णापीता च कर्बुरा
॥२५॥क्षुधा तृष्णा जरा वृद्धा तरुणी क
रुणालया॥कला काष्ठा मुहूर्ता च निमि
षा कालरूपिणी ॥ २६ ॥ सुवर्णरशना
नासा चक्षुःस्पर्शवती रसा ॥ गंधप्रिया सु
गंधा च सुस्पर्शा च मनोगतिः ॥ २७ ॥
मृगनाभिर्मृगाक्षी च कर्पूरामोदधारिणी॥

पद्मयोनिः सुकेशीच सुलिंगा भगरूपिणी ॥२८॥ योनिमुद्रा महामुद्रा खेचरी खग गामिनी ॥ मधुश्रीर्माधवी वल्ली मधुमत्ता मदोद्धता ॥ २९ ॥ मातंगी शुकहस्ता च पुष्पबाणेक्षुचापिनी ॥ रक्तांबरधरा क्षीवा रक्तपुष्पावतंसिनी ॥ ३० ॥ शुभ्रांबरधरा धीरा महाश्वेता वसुप्रिया ॥ सुवेणी प

ब्रह्मस्ता च मुक्ताहारविभूषणा ॥ ३१ ॥
कर्पूरामोदनिःश्वासा पद्मिनी पद्ममंदिरा॥
खड्गिनी चक्रहस्ता च भुशुंडीपरिघायुधा
॥ ३२ ॥ चापिनी पाशहस्ता च त्रिशूल
वरधारिणी॥सुबाणशक्तिहस्ता च मयूर
वरवाहना ॥ ३३ ॥ वरायुधधरा वीरा
वीरपानमदोत्कटा ॥ वसुधा वसुधारा च

जया शाकंभरी शिवा ॥ ३४ ॥ विजया च जयंती च सुस्तनी शत्रुनाशिनी ॥ अंतर्वत्नी वेदशक्तिर्वरदा वरधारिणी ॥ ३५ ॥ शीतला च सुशीला च बालग्रहविनाशिनी ॥ कौमारी च सुपर्वा च कामाख्या कामवंदिता ॥ ३६ ॥ जालंधरधराऽनंता कामरूपनिवासिनी ॥ कामबीजवती

सत्या सत्यधर्मपरायणा ॥३७॥ स्थूलमा
र्गस्थिता सूक्ष्मा सूक्ष्मबुद्धिप्रबोधिनी ॥
षट्कोणा च त्रिकोणा त्रिनेत्रा त्रिपुरसुंदरी
॥ ३८॥ वृषप्रिया वृषारूढा महिषासुरघा
तिनी॥शुंभदर्पहरा दीप्ता दीप्तपावकसन्नि
भा॥ ३९॥ कपालभूषणा काली कपाल
मालधारिणी ॥ कपालकुण्डला दीर्घा शि

वदूती घनध्वनिः ॥४०॥ सिद्धिदा बुद्धिदा
नित्या सत्यमार्गप्रबोधिनी ॥ कम्बुग्रीवा
वसुमती च्छत्रच्छायाकृतालया ॥ ४१ ॥
जगद्भद्रा कुण्डलिनी भुजगाकारशायि
नी ॥ प्रोल्लसत्सप्तपद्मा च नाभिनालमृणा
लिनी ॥ ४२ ॥ मूलाधारा निराकारा
वह्निकुण्डकृतालया ॥ वायुकुण्डसुखासी

ना निराधारा निराश्रया ॥ ४३ ॥ श्वासो
च्छासगतिर्जीवग्राहिणी वह्निसंश्रया ॥
वल्लीतंतुसमुत्थाना षड्रसास्वादलोलुपा
॥ ४४ ॥ तपस्विनी तपःसिद्धिस्तपसां
सिद्धिदायिनी ॥ तपोनिष्ठा तपोयुक्ता ता
पसी च तपःप्रिया ॥ ४५ ॥ सप्तधातुम
यी मूर्तिः सप्तधात्वंतराश्रया ॥ देहपुष्टिर्म

म० १५ नःपुष्टिरन्नपुष्टिर्बलोद्धता ॥ ४६ ॥ ओष स० धिर्वैद्यमाता च द्रव्यशक्तिप्रभाविनी ॥ वैद्या वैद्यचिकित्सा च सुपथ्या रोगनाशिनी ॥४७॥ मृगया मृगमांसादा मृगत्वङ् मृगलोचना ॥ वागुरा बंधरूपा च बंधरूपा वधोद्धता ॥ ४८ ॥ बंदीबंदिस्तुता कारा १५ गारबन्धविमोचिनी ॥ शृंखला खलहा

विद्या दृढबन्धविमोचिनी ॥ ४९ ॥ अं
बिका बालिका चांबा स्वक्षा साधुजना
र्चिता ॥ कौलिकी कुलविद्या च सुकला
कुलपूजिता ॥ ५० ॥ कालचक्रभ्रमिर्भ्रां
ता विभ्रामा भ्रमनाशिनी ॥ वात्याला मे
घमाला च सुवृष्टिः सस्यवर्धिनी ॥ ५१ ॥
अकारा च इकारा च उकारैकाररूपिणी॥

ह्रींकारी बीजरूपा च क्लींकारांबरवासि
ना ॥ ५२ ॥ सर्वाक्षरमयी शक्तिरक्षरा व
र्णमालिनी ॥ सिंदूरारुणवर्णा च सिंदूरति
लकप्रिया ॥ ५३ ॥ वश्या च वश्यबीजा
च लोकवश्यविभाविनी ॥ नृपवश्या नृपैः
सेव्या नृपवश्यकरी प्रिया ॥ ५४ ॥ महि
षा नृपमान्या च नृमान्या नृपनंदिनी ॥

नृपधर्ममयी धन्या धनधान्यविवर्धिनी ॥ ५५ ॥ चतुर्वर्णमयी मूर्तिश्चतुर्वर्णैश्च पूजिता ॥ सर्वधर्ममयी सिद्धिश्चतुराश्रमवासिनी ॥ ५६ ॥ ब्राह्मणी क्षत्रिया वैश्या शूद्रा चावरवर्णजा ॥ वेदमार्गरता यज्ञा वेदिर्विश्वविभाविनी ॥ ५७ ॥ अस्त्रशस्त्रमयी विद्या वरशस्त्रास्त्रधारिणी ॥ सुमेधा सत्यमेधा च भद्रकाल्यपराजिता ॥ ५८ ॥

गायत्री सत्कृतिः संध्या सावित्री त्रिपदा श्रया ॥ त्रिसंध्या त्रिपदी धात्री सुपर्वा सा मगायनी ॥ ५९ ॥ पांचाली बालिका बा ला बालक्रीडा सनातनी ॥ गर्भाधारधरा शून्या गर्भाशयानिवासिनी ॥ ६०॥ सुरा रिघातिनी कृत्या पूजना च तिलोत्तमा॥ लज्जा रसवती नंदा भूवानी पापनाशिनी ॥ ६१ ॥ पट्टांबरधरा गीतिः सुगीतिर्ज्ञान

लोचना॥सप्तस्वरमयी तंत्री षड्जमध्यम
धैवता ॥ ६२ ॥ मूर्च्छनाग्रामसंस्थाना मू
र्च्छासुस्थानवासिनी ॥ अट्टाट्टहासिनी प्रे
ता प्रेतासननिवासिनी ॥ ६३॥ गीतनृत्य
प्रिया कामा तुष्टिदा पुष्टिदाक्षया ॥ निष्ठा
सत्यप्रिया प्रज्ञा लोलाक्षी च सुरोत्तमा
॥६४ ॥सविषा ज्वालिनी ज्वाला विश्व
मोहार्तिनाशिनी॥विषारिर्नागदमनी कुरु

कुल्यामृतोद्भवा ॥ ६५ ॥ भूतभीतिहरा रक्षा भूतावेशविनाशिनी॥रक्षोघ्नी राक्षसी रात्रिर्दीर्घनिद्रानिवारिणी ॥ ६६ ॥ चंद्रिका चंद्रकांतिश्च सूर्यकांतिर्निशाचरी ॥ डाकिनी शाकिनी शिष्या हाकिनी चक्रवाकिनी ॥६७॥ सिता सितप्रिया स्वंगा सकला वनदेवता ॥ गुरुरूपधरा गुर्वी मृत्युर्मारी विशारदा ॥ ६८ ॥ महामारी

विनिद्रा च तंद्रा मृत्युविनाशिनी॥ चंद्रमं
डलसंकाशा चंद्रमंडलवासिनी ॥६९॥ अ
णिमादिगुणोपेता सुस्पृहा कामरूपिणी ॥
अष्टासिद्धिप्रदा प्रौढा दुष्टदानवघातिनी
॥ ७० ॥ अनादिनिधना पुष्टिश्चतुर्बाहुश्च
तुर्मुखी ॥ चतुःसमुद्रशयना चतुर्वर्गफल
प्रदा ॥७१॥ काशपुष्पप्रतीकाशा शरत्कु
मुदलोचना॥भूता भव्या भविष्या च शैल

जा शैलवासिनी ॥७२॥ वाममार्गरता वा
मा शिववामांगवासिनी ॥ वामाचारप्रि
या तुष्टिर्लोपामुद्रा प्रबोधिनी ॥ ७३ ॥ भू
तात्मा परमात्मा च भूतभावविभाविनी ॥
मंगला च सुशीला च परमार्थप्रबोधिनी
॥७४॥ दक्षिणा दक्षिणामूर्तिः सुदीक्षा च
हरिप्रसूः ॥योगिनी योगयुक्ता च योगां
गा ध्यानशालिनी ॥ ७५॥ योगपट्टधरा

मुक्ता मुक्तानां परमागतिः॥नारसिंही स
जन्मा च त्रिवर्गफलदायिनी ॥ ७६ ॥ ध
र्मदा धनदा चैका कामदा मोक्षदा द्युतिः॥
साक्षिणी क्षणदा दक्षा मोक्षदा कोटिरूपि
णी॥७७॥क्रतुः कात्यायिनी स्वच्छा सु
च्छंदा च कविप्रिया॥सत्यागमा बहिस्था
च काव्यशक्तिः कवित्वदा ॥७८॥ मीनपु
त्री सती माता मैनाकभगिनी तडित्॥सौ

भ० दामिनी सुदामा च सुदामाधामशालिनी स०
२० ॥ ७९ ॥ सौभाग्यदायिनी द्यौश्च सुभ
गा द्युतिवर्धनी ॥ श्रीकृत्तिवसना चैव कं
काली कलिनाशिनी ॥ ८० ॥ रक्तबीजव
धोद्युक्ता सुतंतुबार्जसंततिः ॥ जगज्जीवा
जगद्बीजा जगत्त्रयहितैषिणी ॥ ८१ ॥ चा
मीकररुचिश्चांद्रीसाक्षाद्याषोडशीकला॥ २०
यत्तत्पदानुबन्धा च यक्षिणी धनदार्चिता

॥८२॥ चित्रिणी चित्रमाया च विचित्रा
भुवनेश्वरी ॥ चामुंडा मुंडहस्ता च चंडमुं
डवधोद्यता ॥ ८३ ॥ अष्टम्येकादशी पूर्णा
नवमी च चतुर्दशी ॥अमा कलशहस्ता च
पूर्णकुंभपयोधरा ॥ ८४ ॥ अभीरुर्भैरवी
भीरुभीमा त्रिपुरभैरवी ॥महारुंडा च रौ
द्री च महाभैरवपूजिता ॥८५॥ निर्मुंडा ह
स्तिनी चंडा करालदशनानना ॥ कराला

म० विकराला च घोरा घुर्घुरनादिनी ॥८६॥ स०
२१ रक्तदंतोर्ध्वकेशी च बन्धूककुसुमारुणा ॥
कादंबिनीपटा सा च काश्मरी कुंकुमप्रि
या ॥८७॥क्षांतिर्बहुसुवर्णा च रतिर्बहुसुव
र्णदा ॥ मातंगिनी वरारोहा मत्तमातंगगा
मिनी॥८८॥हंसा हंसगतिर्हंसी हंसोज्ज्व
लशिरोरुहा॥पूर्णचंद्रमुखी क्षामा स्मिता २१
स्याश्यामकुण्डला॥८९॥ मषी च लेखनी

लेखा सुलेखा लेखकप्रिया ॥ शंखिनी शं
खहस्ता च जलस्था जलदेवता ॥ ९० ॥
कुरुक्षेत्रावनिः काशी मथुरा कांच्यवंति
का॥अयोध्या द्वारिका माया तीर्था तीर्थ
करप्रिया ॥ ९१॥ त्रिपुष्कराऽप्रमेया च
कोशस्था कोशवासिनी ॥ कौशिकी तु
कुशावर्ता कौशाम्बी कोशवर्द्धिनी ॥ ९२॥
कोशदा पद्मकोशाक्षी कुसुंभकुसुमप्रिया॥

तोतला च तुलाकोटिः कोटस्था कोटरा श्रया ॥९३॥ स्वयंभूश्च सुरूपा च स्वरूपा पुण्यवर्धिनी ॥ तेजस्विनी सुभिक्षा च बलदा बलदायिनी ॥ ९४ ॥ महाकोशी महावार्ता बुद्धिः सदसदात्मिका ॥ महाग्रहहरा सौम्या विशोका शोकनाशिनी ॥९५॥ सात्त्विकी सत्त्वसंस्था च राजसी च रजोवृता ॥ तामसी च तमोयुक्ता गुण

त्रयविभाविनी ॥ ९६ ॥ अव्यक्ता व्यक्त
रूपा च वेदविद्या च शांभवी ॥ शंकरा क
ल्पिनी कल्पा मनःसंकल्पसंततिः ॥९७॥
सर्वलोकमयी शक्तिः सर्वश्रवणगोचरा ॥
सर्वज्ञानवती वांछा सर्वतत्त्वावबोधिका
॥ ९८ ॥ जागृतिश्च सुषुप्तिश्च स्वप्नावस्था
तुरीयका ॥ सत्वरा मंदरा मंदा मदिरा
मोदधारिणी ॥ ९९ ॥ पानभूमिः पानपा

न्नपानदानकरोद्यता ॥ अपूर्णारुणनेत्रा च किंचिदव्यक्तभाषिणी ॥ १०० ॥ आशापूरा च दीक्षा च रक्षा दीक्षितपूजिता॥ नागवल्ली नागकन्या भोगिनी भोगवल्लभा ॥१॥ सर्वशास्त्रमयी विद्या सुस्मृतिर्धर्मवादिनी ॥ श्रुतिस्मृतिधरा ज्येष्ठा श्रेष्ठा पातालवासिनी ॥ २ ॥ मीमांसा तर्कविद्या च सुभक्तिर्भक्तवत्सला ॥ सुनाभिया

तना जातिर्गभीरा भाववर्जिता ॥३॥ ना
गपाशधरा मूर्तिरगाधा नागकुंडला ॥ सु
चक्रा चक्रमध्यस्था चक्रकोणनिवासि
नी॥ ४ ॥ सर्वमंत्रमयी विद्या सर्वमंत्राक्ष
रावलिः॥मधुस्रवा स्रवंती च भ्रामरी भ्रम
रालका ॥ ५ ॥ मातृमंडलमध्यस्थामा
तृमंडलवासिनी ॥ कुमारजननी क्रूरा सु
मुखीज्वरनाशिनी ॥ ६ ॥ अतीता विद्यमा

ना च भाविनी प्रीतिमअरी ॥ सर्वसौख्य
वती युक्तिराहारपरिणामिनी ॥ ७ ॥ नि
धानापञ्चभूतानांभवसागरतारिणी ॥ अ
क्रूरा च ग्रहवती विग्रहा ग्रहवर्जिता ॥८॥
राहिणी भूमिगर्भा च कालभूः कालवार्ति
नी॥कलंकरहिता नारी चतुःषष्ट्यभिधा
वती ॥९॥ जीर्णा च जीर्णवस्त्रा च नूतना
नववल्लभा॥अरजा च रतिप्रीतिरतिरागवि

वर्धिनी ॥ ११० ॥ पंचवातगतिर्भिन्ना
पंचश्लेष्माशयाधरा ॥ पंचपित्तवती श
क्तिः पंचस्थानविभाविनी ॥ १११ ॥ उद
क्या च वृषस्यंती बहिःप्रस्रवणी व्यहा ॥
रजःशुक्रधरा शक्तिर्जरायुर्गर्भधारिणी
॥ १२ ॥ त्रिकालज्ञा त्रिलिंगा त्रिमूर्तिस्त्रि
पुरवासिनी ॥ अरागा शिवतत्त्वा च काम
तत्त्वानुरागिणी ॥ १३ ॥ प्राच्यवाची प्र

तीची दिगुदीची दिग्विदिग्दिशा ॥ अहंकृ
तिरहंकाराबालामाया बलिप्रिया ॥ १४ ॥
स्रुक्स्रुवा सामिधेनी च सुश्रद्धा श्राद्धदेव
ता॥माता मातामही तृप्तिः पितृमातापि
तामही॥ १५ ॥स्नुषा दौहित्रिणी पुत्री पौ
त्री नप्त्री शिशुप्रिया॥स्तनदा स्तनधारा
च विश्वयोनिः स्तनंधयी ॥ १६ ॥ शिशू
त्संगधरा दोला दोलाक्रीडाभिनंदिनी ॥

उर्वशी कदली केका विशिखा शिखिवार्ति
नी ॥ १७ ॥ खट्वांगधारिणी खट्वाबाणपुं
खानुवर्तिनी ॥ लक्ष्यप्राप्तिकरा लक्ष्याल
क्ष्या च शुभलक्षणा ॥१८॥ वर्तिनी सुप
थाचारा परिखा च खानिर्वृतिः॥प्राकारव
लया वेला मर्यादा च महोदधौ॥१९॥
पोषिणी शोषिणी शक्तिर्दीर्घकेशी सुलो
मशा ॥ ललिता मांसला तन्वी वेदवेदांग

धारिणी ॥१२०॥ नरासृक्पानमत्ता च न
रमुण्डास्थिभूषणा॥ अक्षक्रीडारतिःसारी
सारिका शुकभाषिणी ॥२१॥ शाबरी गा
रुडीविद्या वारुणी वरुणार्चिता॥वाराही
तुंडहस्ता च दंष्ट्रोद्धृतवसुंधरा ॥२२॥ मी
नमूर्तिधरा मूर्ता वदान्याऽप्रतिमाश्रया ॥
अमूर्ता निधिरूपा च शालिग्रामशिला
शुचिः ॥२३॥ स्मृतिः संस्काररूपा च सु

संस्कारा च संस्कृतिः॥प्राकृता देशभाषा च गाथा गीतिः प्रहेलिका ॥२४॥ इडा च पिंगला पिंगा सुषुम्णासूर्यवाहिनी॥शशिस्रवा च तालस्था काकिन्यमृतजीविनी ॥२५॥ अणुरूपा बृहद्रूपा लघुरूपा गुरुः स्थिरा ॥ स्थावरा जंगमादेवी कृतकर्मफलप्रदा॥२६ ॥ विषयाक्रांतदेहा च निर्विशेषा जितेंद्रिया ॥ विश्वरूपा चिदानंदा पर

ब्रह्मप्रबोधिनी ॥२७॥ निर्विकारा च निर्वैरा विरतिः सत्यवर्धिनी॥ पुरुषाज्ञा च भिन्ना च क्षांतिः कैवल्यदायिनी ॥२८॥ विविक्तसेविनी प्रज्ञा जनयित्री बहुश्रुतिः ॥ निरीहा च समस्तैका सर्वलोकैकसेविता ॥ २९ ॥ सेवा सेवाप्रिया सेव्या सेवाफलविवर्धिनी ॥ कलौ कल्किप्रिया काली दुष्टम्लेच्छविनाशिनी ॥१३०॥ प्रत्यंचा च

धनुर्यष्टिः खड्गधारा दूरानतिः ॥ अश्वप्लुतिश्च वल्गा च सृणिः सन्मृत्युवारणा ॥ ३१ ॥ वीरभूर्वीरमाता च वीरसूर्वीरिनंदिनी ॥ जयश्रीर्जयदीक्षा च जयदा जयवर्धिनी ॥ ३२ ॥ सौभाग्यसुभगाकारा सर्वसौभाग्यवर्धिनी ॥ क्षेमंकरी सिद्धिरूपा सत्कीर्तिः पथिदेवता ॥ ३३ ॥ सर्वतीर्थमयी मूर्तिः सर्वदेवमयी प्रभा ॥ सर्वसि

द्धिप्रदा शक्तिः सर्वमंगलमंगला ॥ ३४ ॥
पुण्यं सहस्रनामेदं शिवायाः शिवभाषि
तम्॥यःपठेत्प्रातरुत्थायशुचिर्भूत्वा समा
हितः॥ ३५ ॥ यश्चापि शृणुयान्नित्यं नरो
निश्चलमानसः॥एककालं द्विकालंवात्रि
कालं श्रद्धयाऽन्वितः॥ ३६ ॥ सर्वदुःखवि
निर्मुक्तो धनधान्यसमन्वितः ॥ तेजस्वी
बलवाञ्छूरः शोकरोगविवर्जितः॥ ३७ ॥

यशस्वी कीर्तिमान् धन्यः सुभगोलोकपू
जितः ॥ रूपवान् गुणसंपन्नः प्रभावीर्य
समन्वितः ॥३८॥ श्रेयांसि लभते नित्यं
निश्चलां च शुभां श्रियम् ॥ सर्वपापवि
निर्मुक्तो लोभक्रोधविवर्जितः ॥ ३९ ॥
नित्यं बंधुसुतैर्दारैः पुत्रपौत्रैर्महोत्सवैः ॥नं
दितः सेवितो भृत्यैर्बहुभिः शुचिमानसैः
॥ १४०॥ विद्यानां पारगो विप्रः क्षत्रियो

विजयी रणे॥ वैश्यस्तु धनलाभाढ्यः शूद्रः सुखमवाप्नुयात्॥४१॥पुत्रार्थी लभते पुत्रं धनार्थी विपुलं धनम् ॥ इच्छाकामंतुकामार्थी धर्मार्थी धर्ममक्षयम् ॥ ४२ ॥ कन्यार्थी लभते कन्यां रूपशीलगुणान्विताम् ॥क्षेत्रं च बहुसस्यं स्याद्गावस्तु बहुदुग्धदाः॥४३॥ नाशुभं नापदस्तस्य न भयं नृपशत्रुतः ॥ जायते नाशुभा बुद्धिर्लभते

कुलधुर्यताम् ॥ ४४ ॥ न बाधंते ग्रहास्त
स्य न रक्षांसि न पन्नगाः ॥ न पिशाचा न
डाकिन्यो भूतव्यंतरजंबुकाः ॥४५॥ बाल
ग्रहाभिभूतानां बालानां शांतिकारकम् ॥
द्वंद्वानां प्रीतिभेदे च मैत्रीकरणमुत्तमम्
॥ ४६ ॥ लोहपाशैर्दृढैर्बद्धो बद्धो वेश्मनि
दुर्गमे ॥ तिष्ठन् शृण्वन् पठन्मर्त्यो मुच्यते
नात्र संशयः॥४७॥ न दाराणां न पुत्राणां

म० न बंधूनां न मित्रजम्॥पश्यंति ते न शोकं स०
३० हि वियोगं चिरजीविताम् ॥ ४८ ॥ अंध
स्तु लभते दृष्टिं चक्षूरोगैर्न बाधते॥बधिरः
श्रुतिमाप्नोति मूको वाचं शुभां नरः॥४९॥
पतद्गर्भा च या नारी स्थिरगर्भा प्रजायते॥
स्राविणी बद्धगर्भा च सुखमेव प्रसूयते
॥१५०॥ कुष्ठिनः शीर्णदेहा ये गतकेशन ३०
खत्वचः ॥ पठनाच्छ्रवणाद्वाऽपि दिव्यका

या भवंति ते॥५१॥ये पठंति सदा मर्त्याः
शुचिष्मंतो जितेंद्रियाः॥ अपुत्राः प्राप्नुयुः
पुत्रान्छृण्वंतोऽपि न संशयः॥ ५२॥
महाव्याधिपरिग्रस्तास्तप्ता ये विविधै
र्ज्वरैः॥ भूताभिषंगसंघातैश्चातुर्थिकतृती
यकैः॥ ५३॥ अन्यैश्च दारुणै रोगैः
पीड्यमानाश्च मानवाः॥ गतबाधाः

म० ३१ प्रजायते तैमुक्ता नात्र संशयः ॥ ५४ ॥ स०
श्रुतिग्रंथधरो बालो दिव्यवादी कवी
श्वरः ॥ पठनाच्छ्रवणाद्वाऽपि भवत्येव न
संशयः ॥ ५५ ॥ अष्टम्यां वा चतुर्दश्यां
नवम्यां चैकचेतसः ॥ ये पठंति सदा
मर्त्या न ते वै दुःखभाजनाः ॥ ५६ ॥
नवरात्रं जिताहारो दृढभक्तिर्जितेंद्रियः ॥ ३१
चण्डिकायतने विद्वान् शुचिष्मान्मूर्तिस

न्निधौ ॥५७॥ एकाकी तु शतावृत्या पठ
न्धीरश्च निर्भयः ॥ साक्षाद्भगवती तस्मै
प्रयच्छेदीप्सितं फलम् ॥ ५८ ॥ सिद्ध
पीठे गिरौ रम्ये सिद्धक्षेत्रे सुरालये ॥
पठनात्साधकस्याशु सिद्धिर्भवति वांछि
ता ॥ ५९ ॥ दशावर्तं पठेद्यस्तु भूमि
शायी नरः शुचिः ॥ स्वप्ने मूर्तिमयीं
देवीं वरदां सोऽपि पश्यति ॥ १६० ॥

कवित्वं संस्कृते तेषां शास्त्राणां व्याकृतौ स्वतः ॥ शक्तिः प्रोन्मील्यते शास्त्रेष्वनधीतेषु भारती ॥ ६१ ॥ आवर्तनसहस्रैर्ये पठन्ति पुरुषोत्तमाः ॥ ते सिद्धाः सिद्धिदालोकेशापानुग्रहणेक्षमाः ॥ ६२ ॥ नखरागशिरोरत्नाद्विगुणीकृतरोचिषः ॥ प्रयच्छंतश्च सर्वस्वं सेवंते तान्महीश्वराः ॥ ६३ ॥ रोचनालिखितं भूर्जे

कुंकुमेन शुभे दिने ॥ धारयेद्यंत्रितं देहे पूजयित्वा कुमारिकाम् ॥ ६४ ॥ विप्रांश्च वरनारीश्च धूपैः कुसुमचंदनैः ॥ क्षीर खंडाज्यभोज्यैश्च पूजयित्वा सुभूषिताः ॥ ६५ ॥ बध्नंति ये महारक्षां बालानां च विशेषतः ॥ भवंति नृपपूज्यास्ते कीर्तिभाजो यशस्विनः ॥ ६६ ॥ शत्रुतो

न भयं तेषां दुर्जनेभ्यो न राजतः ॥ न च दाराभिचारिभ्यो न दारिद्र्यं स पश्यति ॥ ६७॥ महार्णवे महानद्यां स्थितेऽपि च न भीः क्वचित् ॥ रणे द्यूते विवादे च विजयं प्राप्नुवंति ते ॥ ६८ ॥ नृपाश्च वश्यतां यांति नृपमान्याश्च ये नराः ॥ सर्वत्र पूजिता लोके बहुमानपुरःसराः ॥ ६९ ॥

रतिरागविवृद्धाश्च विह्वलाः कामपीडिताः ॥ यौवनाक्रांतदेहास्ताः श्रूयंते वामलोचनाः ॥ १७० ॥ लिखितं मूर्ध्नि कंठे वा धारयेद्यो रणे शुचिः ॥ शतधा युध्यमानं तं प्रतियोद्धा न पश्यति ॥ ७१ ॥ केतौ वा दुंदुभौ येषां तिष्ठते लिखितं रणे ॥ मायासैन्यपरिग्रस्तन्

कांदिशीकान् हतौजसः ॥ ७२ ॥ विचे
तनान्विमूढांश्च शत्रुकृत्परिवर्जितान् ॥
निर्जित्य शत्रुसंघाताल्लभते विषयं ध्रुवम्
॥ ७३ ॥ नाभिचारो न शापश्च बाणवीरा
दिकीलनम् ॥ डाकिनी पूतना कृत्या
महामारी च शाकिनी॥७४॥भूताः प्रेताः
पिशाचाश्च रक्षांसि व्यंतरादयः ॥ न वसं

ति गृहे देहे लिखितं यत्र तिष्ठति ॥७५॥
न शस्त्रानलतोयौघाद्भयं तस्योपजायते ॥
दुर्वृत्तानां च पापानां बलहानिकरं
परम् ॥ ७६ ॥ मंदुराकरिशालासु गवां
गोष्ठे समाहितः ॥ पठेत्तद्दोषशांत्यर्थं कूटं
कपटनाशिनी ॥७७॥ यमदूतान्न पश्यंति
न ते निरययातनाम् ॥ प्राप्नुवंति क्षयं

प्रांते शिवलोकं सनातनम् ॥ ७८ ॥ स
र्वाबाधासु घोरासु सर्वदुःखनिवारणम् ॥
सुमंगलकरं स्वर्ग्यं पठितव्यं समाहितैः
॥७९॥ श्रोतव्यं च सदा भक्त्या परं स्व
स्त्ययनं महत्॥पुण्यं सहस्रनामेदमंबाया
रुद्रभाषितम् ॥ १८० ॥ चतुर्वर्गप्रदं सत्यं
नंदिकेन प्रकाशितम्॥नातः परतरो मंत्रो

नातः परतरः स्तवः ॥८१॥ नातः परतरा
विद्या तीर्थं नातः परात्परम्॥ते धन्याःकृ
तपुण्यास्ते त एव भुवि पूजिताः ॥ ८२ ॥
एकवारंमुदा नित्यं येऽर्चयंति महेश्वरीम्॥
देवतानां देवता या ब्रह्माद्यैर्या च पूजिता
॥ ८३ ॥ भूयात्सा वरदा लोके साधूनां
विश्वमंगला ॥ एतामेव पुराऽऽराध्य विद्यां

त्रिपुरभैरवीम् ॥ त्रैलोक्यमोहिनीरूपम
कार्षीद्भगवान् हरिः ॥ १८४ ॥

इति श्रीरुद्रयामले तंत्रे शिव नंदिकेश्वरसंवादे महाप्रभावो
भवानीसहस्रनामस्तवराजः संपूर्णः ।

ॐ श्रीगेणशाय नमः ॥ ॐ अस्य
श्रीइंद्राक्षीस्तोत्रमंत्रस्य ॥ पुरंदरऋषिः ॥
अनुष्टुप्छंदः ॥ इंद्राक्षीदेवता॥ह्रीं बीजम् ॥
श्रीं शक्तिः ॥ क्लीं कीलकम्॥सकलकाम
नासिध्दचर्थे पाठे विनियोगः ॥ अथ ध्या
नम्॥इन्द्राक्षीं द्विभुजां देवीं पीतवस्त्रधरां
शुभाम्॥वामे हस्ते वज्रधरां दक्षिणे चाभय

प्रदाम् ॥१॥ सहस्रनेत्रां सूर्याभां नानालं
कारभूषिताम् ॥ प्रसन्नवदनां नित्यमप्स
रोगणसेविताम् ॥२॥ श्रीदुर्गां सौम्यवद
नां पाशांकुशधरां पराम् ॥ त्रैलोक्यमो
हिनीं देवीं भवानीं प्रणमाम्यहम् ॥ ३ ॥
इति ध्यानम् ॥ ॐ ह्रीं श्रीं इंद्राक्षीं श्रीं पें
स्वाहा॥इंद्र उवाच॥इंद्राक्षी नाम सा देवी

दैवतैः समुदाहृता ॥ गौरी शाकंभरी देवी
दुर्गानाम्नीतिविश्रुता ॥ १ ॥ कात्यायनी
महादेवी चंद्रघंटामहातपाः ॥ गायत्री सा
च सावित्री ब्रह्माणी ब्रह्मवादिनी ॥ २ ॥
नारायणी भद्रकाली रुद्राणी कृष्णपिंग
ला ॥ अग्निज्वाला रौद्रमुखी कालरात्रि
स्तपस्विनी ॥ ३ ॥ मेघश्यामा सहस्राक्षी

विष्णुमाया जलोदरी ॥ महोदरी मुक्त
केशी घोररूपा महाबला ॥ ४ ॥ आनंदा
भद्रजा नंदा रोगहंत्री शिवप्रिया ॥ शिव
दूती कराली च प्रत्यक्षा परमेश्वरी ॥५॥
इंद्राणी चंद्ररूपा च इंद्रशक्तिपरायणा ॥
महिषासुरसंहर्त्री चामुंडा गर्भदेवता ॥६॥
वाराही नारसिंही च भीमा भैरवना

दिनी ॥ श्रुतिः स्मृतिर्धृतिर्मेधा विद्या
लक्ष्मीः सरस्वती ॥ ७ ॥ आनंदा विजया
पूर्णा मानस्तोकाऽपराजिता ॥ भवानी
पार्वती दुर्गा हैमवत्यंबिका शिवा ॥ ८ ॥
शिवा भवानी रुद्राणी शंकरार्धशरी
रिणी ॥ एतैर्नामपदैर्दिव्यैः स्तुता शक्रेण
धीमता ॥ ९ ॥ आयुरारोग्यमैश्वर्यं सुख

संपत्तिकारकम् ॥ क्षयापस्मारकुष्ठादि तापज्वरनिवारणम् ॥ १० ॥ शतमाव र्तयेद्यस्तु मुच्यते व्याधिबंधनात् ॥ आव र्तयेत्सहस्रेण लभते वांछितं फलम् ॥ ११ ॥ राज्यवश्यमवाप्नोति सर्वमेव न संशयः॥लक्षमेकं जपेद्यस्तु साक्षाद्देवी भविष्यति ॥ १२ ॥ त्रिकालं पठते नित्यं

धनधान्यं च संपदः ॥ अर्धरात्रे पठेन्नित्यं
मुच्यते पापबंधनात् ॥ १३ ॥ इदं स्तोत्र
मिदं पुण्यं जपे तु फलमाप्नुयात् ॥ विना
शयति रोगाणामपमृत्युं हरत्युत ॥१४॥
राज्यार्थी लभते राज्यं धनार्थी विपुलं
धनम् ॥ इच्छाकामं तु कामार्थी धर्मार्थी
धर्ममक्षयम् ॥ १५ ॥ विद्यार्थी लभते

विद्यां मोक्षार्थी परमं पदम् ॥ इन्द्रेण क
थितं स्तोत्रं सत्यं सत्यं न संशयः ॥१६॥
इति श्रीइन्द्राक्षीस्तोत्रं सम्पूर्णम् ॥ * ॥

इदं पुस्तकं मोहमय्यां श्रीकृष्णदासात्मज–क्षेमराजश्रेष्ठिना स्वकीये
"श्रीवेंकटेश्वर" स्टीम्–मुद्रणागारे मुद्रयित्वा प्रकाशितम् ।
शकाब्दाः १८५३, संवत् १९८८ ।

पुस्तक मिलनेका पता–

खेमराज श्रीकृष्णदास,
"श्रीवेङ्कटेश्वर" स्टीम्–प्रेस,
बम्बई.

गङ्गाविष्णु श्रीकृष्णदास,
"लक्ष्मीवेङ्कटेश्वर" स्टीम्-प्रेस
कल्याण–बम्बई.

मुद्रक और प्रकाशक–

खेमराज श्रीकृष्णदास,

मालिक–"श्रीवेङ्कटेश्वर" स्टीम्–प्रेस, बम्बई.

पुनर्मुद्रणादि सर्वाधिकार "श्रीवेङ्कटेश्वर" स्टीम् मुद्रणयन्त्रालयाध्यक्षाधीन है।

इति

भवानीसहस्रनाम

इन्द्राक्षीस्तोत्रं च ।

5
6

3